STOTRADHWANI

## 67 - सप्तषष्टितम दशकम्
## श्रीकृष्ण तिरोधानम्

स्फुरत् परानन्द रसात्मकेन त्वया समासा दित भोग लीला: ।
असीम मानन्दभरं प्रपन्ना: महान्त मापुर् मद मम्बुजाक्ष्य: ॥ ॥67-1॥

निलीयतेऽसौ मयि मय्यमायं रमापतिर् विश्व मनोभिराम: ।
इतिस्म सर्वा: कलिताभि माना: निरीक्ष्य गोविन्द तिरोहितोऽभू: ॥ ॥67-2॥

राधाभिधां ताव दजात गर्वाम् अति प्रियां गोपवधूं मुरारे ।
भवा नुपादाय गतो विदूरं तया सह स्वैर विहार कारी ॥ ॥67-3॥

तिरोहितेऽथ त्वयि जात तापा: समं समेता: कमलाय ताक्ष्य: ।
वने वने त्वां परिमार्गयन्त्य: विषाद मापुर् भगवन् नपारम् ॥ ॥67-4॥

हा चूत हा चम्पक कर्णिकार हा मल्लिके मालति बाल वल्ल्य: ।
किं वीक्षितो नो हृदयैक चोर: इत्यादितास् त्वत् प्रवणा विलेपु: ॥ ॥67-5॥

निरीक्षितोऽयं सखि पङ्कजाक्ष: पुरो ममेत्याकुल मालपन्ती ।
त्वां भावना चक्षुषि वीक्ष्य काचित् तापं सखीनां द्विगुणी चकार ॥ ॥67-6॥

त्व दात्मिकास् ता यमुना तटान्ते तवानु चक्रु: किल चेष्टितानि ।
विचित्य भूयोऽपि तथैव मानात् त्वया विमुक्तां ददृशुश्च राधाम् ॥ ॥67-7॥

ततस् समं ता विपिने समन्तात् तमोवता रावधि मार्ग यन्त्य: ।
पुनर् विमिश्रा यमुना तटान्ते भृशं विलेपु-श्च जगुर् गुणांस्ते ॥ ॥67-8॥

तथा व्यथा सङ्कुल मानसानां व्रजाङ्गनानां करुणैक सिन्धो ।
जगत्रयी मोहन मोहनात्मा त्वं प्रादुरासी रयि मन्दहासी ॥ ॥67-9॥

सन्दिग्ध सन्दर्शन मात्म कान्तं त्वां वीक्ष्य तन्व्यस् सहसा तदानीम् ।
किं किं न चक्रुः प्रमदाति भारात् सत्वं गदात् पालय मारुतेश ॥॥67-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥